# NATIONAL SANSKRIT UNIVERSITY

TIRUPATI – 517 507 (A.P.)

F.No. NSUT/Cir/2022 Dated 10.08.2022

## CIRCULAR No.23 of 2022-23

All the Teaching, Non-Teaching staff and students are cordially invited to attend the Inaugural function of Sanskrit Week Celebrations-2022 at Indoor Stadium, National Sanskrit University, Tirupati on 10.08.2022 at 4:00 PM.

All are advised to follow the COVID-19 guidelines issued by the Govt. of India i.e. wearing Masks, Using hand sanitizers and social distancing during the function.

10/08/2022

**REGISTRAR**

Encls. Invitation Card.

To

Circulate among all staff members and students of the University.

Copy to

The Dean, Academic Affairs
The Deputy Registrar
The Assistant Registrar (Admn.)
PS to Vice-Chancellor
PS to Registrar
PS to Finance Officer
Circular file.
Personal file.

# राष्ट्रीय संस्कृत विश्वविद्यालय - तिरुपति
# NATIONAL SANSKRIT UNIVERSITY – TIRUPATI

F.No.NSUT/Estt. /2022-23 दिनांक/Date: 11.08.2022

**CIRCULAR No.26 of 2022-23**

**Sub:** National Sanskrit University- Organizing Sobha Yatra on the Occasion of Sanskrit Week Celebrations and Azadi Ka Amrut Mahotsav on 12th August, 2022 – Regarding.

*****

The National Sanskrit University, Tirupati is organizing Sobha Yatra on the Occasion of Sanskrit Week Celebrations and Azadi Ka Amrut Mahotsav on 12th August, 2022 (Friday) at 09:00 A.M. in front of the Academic Building, National Sanskrit University.

All the Teaching, non-Teaching staff, students and residents of the staff quarters are requested to make it convenient to take part in the event and make it a grand success, by maintaining COVID Appropriate Behaviour.

11/08/2022

REGISTRAR

To

1. All the Teaching and Non-Teaching Staff
2. Co-ordinator, Sanskrit Week Celebrations
3. Vinayaka Security Services- to provide security assistance during the event

**NATIONAL SANSKRIT UNIVERSITY**
**Tirupati – 517 507.**

**F.No. RSV/R/Cir./2021** **Dated 19-08-2021**

<u>सूचना / **CIRCULAR-R-25**</u>

सर्वेऽपि आचार्याः, अंशकालिकाध्यापकाः, सहायाचार्याः, अधिकारिणः, कर्मचारिणश्च संसूच्यन्ते यत् अस्माकं विश्वविद्यालयेन श्वः 20-8-2021 आरभ्य 26-8-2021 पर्यन्तं संस्कृतसप्ताहः अन्तर्जालमाध्यमेन समायोज्यते । तदङ्गतया अनेके शैक्षिकाः सांस्कृतिकाश्च कार्यक्रमाः निरुह्यन्ते । अतः सर्वेऽपि एषु सर्वेष्वपि कार्यक्रमेषु अवश्यं भागं गृह्णन्तु इति प्रार्थ्यन्ते ।

कुलसचिवः (प्रभारी) / Registrar i/c

To

Circulate among all the teaching and non-teaching staff members of the University.


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
संस्कृतस्य सेवनम्
संस्कृताय जीवनम्
संस्कृतसप्ताहः 2021
लोकहितसमृद्धये
भवतु तनुसमर्पणम्
"अनुग्रहभाषणम्" कोसलेशसदनपीठाधीशाः
श्रीमज्जगद्गुरुश्रीवासुदेवाचार्यविद्याभास्करस्वामिमहाराजाः
दिनाङ्कः - 23.08.2021
श्रावण-कृष्ण-प्रथमा
सोमवासरः
सायम् – 4:00 वादने
सभासञ्चालकः
आचार्य चक्रवर्तिरङ्गनाथन्
सभाध्यक्षः
आचार्यः विरिवेण्टि मुरलीधरशर्मा
कुलपतिः
संस्कृतप्रसारप्रचारणोपायाः
स्वागतभाषणम्
डा. पङ्कजव्यासः
धन्यवादसमर्पणम्
डा. सोमनाथदाशः
ID: 99196061222
zoom Passcode: 123
कार्यक्रमस्य प्रसारः मुखपुस्तके (Facebook) भवति
National Sanskrit University, Tirupati

# संस्कृतसप्ताहः

दिनाङ्कः - २०-२६.०८.२०२१

## उद्घाटनसमारोहः

प्रतिवर्षमिव ऐषमोऽपि राष्ट्रियसंस्कृतविश्वविद्यालये २०.०८.२०२१ दिनाङ्कादारभ्य २६.०८.२०२१ दिनाङ्कपर्यन्तम् अन्तर्जालमाध्यमेन संस्कृतसप्ताहः महता उत्साहेन समाचर्यत । २०.०८.२०२१ दिनाङ्के संस्कृतसप्ताहस्य समुद्घाटनकार्यक्रमः समायोज्यत । राष्ट्रियसंस्कृतविश्वविद्यालयस्य मान्याः कुलाधिपतयः पद्मभूषणभूषिताः श्रीमन्तः नीलमङ्गलम् गोपालस्वामिवर्याः कार्यक्रमस्य समुद्घाटकाः अध्यक्षाश्च आसन् । विश्वविद्यालयस्य मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः समागतानाम् अतिथीनां सम्माननमकार्षुः । उद्घाटनकार्यक्रमस्य मुख्यातिथित्वेन विश्वविद्यालयस्य शैक्षणिकसंकायचराः राष्ट्रपतिपुरस्कारेण सम्मानिताः साहित्यशास्त्रपयोनिधयः परमश्रद्धेयाः आचार्याः श्रीमल्लादिरामसूर्यनारायणमहोदयाः उपस्थाय "**संस्कृतवचोविच्छित्तिः**" इति विषये पाण्डित्यपूर्णं व्याख्यानमदुः । कार्यक्रमेऽस्मिन् समागतानां सर्वेषां हार्दं स्वागतं व्यधुः साहित्यविभागस्य वरिष्ठाः आचार्याः कवयः आर्षविद्यानिकेतनस्य निदेशकाः मान्याः आचार्याः वि.एस्.आर्. कृष्णमूर्तिमहोदयाः । वैदिकप्रार्थनया सह संस्कृतसप्ताहकार्यक्रमस्य उद्घाटनसत्रं समारभत । विश्वविद्यालयस्य वेदविभागाध्यक्षाः डा. निरञ्जनमिश्रमहोदयाः वैदिकप्रार्थनामकुर्वन् । श्रीमती अनुव्रता नरसिंहन्महोदया सरस्वतीवन्दनाम् अकरोत् । आचार्याः के. राजगोपालन्महोदयाः कार्यक्रमान्ते वन्दनार्पणम् अकुर्वत । उद्घाटनकार्यक्रमस्य संचालनं साहित्यविभागस्य अध्यक्षाः आचार्याः च. रङ्गनाथन्महोदयाः अकुर्वन् । ऐषमः संस्कृतसप्ताहमहोत्सवस्य संयोजकाः आचार्याः च. रङ्गनाथन्महोदयाः एवं डा. नारायणमहोदयाश्च आसन् । महोत्सवस्यास्य सप्तसु दिनेषु अन्तर्जालमाध्यमेन विविधाः कार्यक्रमाः समायोजिषत ।



संस्कृतसप्ताहस्य द्वितीयदिवसे २१.०८.२०२१ दिनाङ्के सर्वेषां कृते "कवितागोष्ठी" आयोजिता आसीत् । विश्वविद्यालयस्य अनेके प्रथितकवयः स्वरचितकवितामाधुरीं प्रादर्शयन् । अस्याः गोष्ठ्याः सभाध्यक्षाः कविसमवाये मूर्धन्याः विश्वविद्यालयस्य अपरकालिदासाः साहित्यव्याकरणादिशास्त्रनिष्णाताः आचार्याः वि.एस्.आर्. कृष्णमूर्तिमहोदयाः निरवहन् । सभासंचालनं साहित्यविभागस्य आचार्याः सत्यनारायणाचार्याः अकुर्वन् । समागतानां सर्वेषां कविवराणां सभाध्यक्षाणां सहृदयानां च स्वागतम् अनुसन्धानप्रकाशनविभागस्य उपाचार्याः डा. शिवरामभट्टमहोदयाः व्याहरन् । कार्यक्रमस्यान्ते साहित्यविभागस्य उपाचार्याः डा. ललितचक्रवर्तिमहोदयाः वन्दनार्पणम् अकार्षुः । सर्वेऽपि कवयः प्रकृतिप्रेमदेशसंस्कृत्यादिविविधविषयान् आश्रित्य कविताः आरचय्य स्वकवितापाठेन सभां समतोषयन् ।






जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥

संस्कृतसप्ताहस्य तृतीयदिवसे २१.०८.२०२१ दिनाङ्के श्रावणपौर्णमास्यां रविवासरे "संस्कृते विज्ञानम्" इति विषयमाधृत्य विशिष्टव्याख्यानम् आयोजितमासीत् । मुख्यवक्तृत्वेन केरलदेशस्य प्रथितविद्वांसः नानाभाषाभाषिणः आचार्याः के.एस्. कण्णन्वर्याः समाहूताः स्वविशिष्टव्याख्यानेन सर्वाननुद्बोधितवन्तः । विश्वविद्यालयस्यास्य वेदवेदाङ्गसंकायप्रमुखाः ज्यौतिषविभागस्य ज्येष्ठाः आचार्याः ए. श्रीपादभट्टमहोदयाः सभाध्यक्षत्वं निरवहन् । शैक्षिकसंकायप्रमुखाः आचार्याः प्रह्लादजोशिमहोदयाः कार्यक्रमस्य संचालनं कृतवन्तः । समागतानां सर्वेषां जनानां स्वागतं शिक्षाशास्त्रविभागस्य आचार्याः राधागोविन्दत्रिपाठिमहोदयाः व्यधुः । कार्यक्रमस्यान्ते धन्यवादसमर्पणं शिक्षाशास्त्रविभागस्य आचार्याः के. कादम्बिनीमहोदयाः अकुर्वन् ।





अन्तर्जालमाध्यमेन आयोजितस्य संस्कृतसप्ताहस्य कानिचन भावचित्राणि






## WORK-LIFE BALANCE

**Date - 16.08.2021**

An interactive session organized by the University for women staff on WORK-LIFE BALANCE at councils hall, Administrative Building, National Sanskrit University, Tirupati on 16.08.2021 at 10:30 A.M. Invited two external experts Smt. C. Ramanakumari and Smt. C. Sahaja.





The following members were participated in the above topic. 1.Dr.Sujani, 2.Dr.Swetha, 3.Smt.Swaroopa, 4.Smt.Usha, 5.Smt.Vanitha, 6.Lohitha, 7.Raasi, 8.Nagaveni, 9.Sireesha and other staff participated.

## विशिष्टव्याख्यानम्

राष्ट्रियसंस्कृतविश्वविद्यालयस्य अद्वैतवेदान्तविभागेन शास्त्रपरिरक्षणकेन्द्रेण (गुरुकुलेन) च १५.०९.२०२१ दिनाङ्के विशिष्टव्याख्यानं समायोजितम्। तत्र महामहोपाध्यायाः अद्वयी-विद्यावाचस्पतिमहोदयाः "अवच्छेदवादः बिम्बप्रतिबिम्बवादश्च" इति विषयमुद्दिश्य विशिष्टव्याख्यानं कृतवन्तः। मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः कार्यक्रमस्य आध्यक्ष्यं निरवहन्। अन्तर्जालमाध्यमेन अयं कार्यक्रमः समायोजितः। विश्वविद्यालयस्य आचार्याः उपाचार्याः सहाचार्याः शोधच्छात्राः छात्राः च कार्यक्रमेऽस्मिन् उपस्थिताः आसन्। मार्गदर्शकाः अद्वैतवेदान्तविभागाध्यक्षाः शास्त्रपरिरक्षणकेन्द्रनिदेशकाश्च आचार्याः वे. गणपतिभट्टमहोदयाः आसन्। संयोजकाः श्रीमन्तः श्रीनिवासमूर्तिमहोदयाः आसन्।



संस्कृतसप्ताहस्य चतुर्थदिवसे २३.०८.२०२१ दिनाङ्के कोमालेश्वरदत्तपीठाधीशानां सतां विद्याविभूषणानां श्रीमज्जगद्गुरुश्रीवासुदेवानन्दसरस्वतीस्वामिमहाराजानां "संस्कृतप्रसारप्रचारयोपायाः" इति विषयमाधृत्य अनुग्रहभाषणम् आयोजितमासीत् । आनुकूलव्यः आशीर्वचने स्वामिनः साम्प्रतिके काले संस्कृतस्य प्रचाराय प्रसाराय च विविधानुपायान् समसूचयन् । कार्यक्रमस्यास्य सभाध्यक्षः मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः आसन् । साहित्यविभागस्य अध्यक्षाः संस्कृतसप्ताहस्य संयोजकाः आचार्याः च. रङ्गनाथन्महोदयाः सभां समचालयन् । व्याकरणविभागस्य उपाचार्याः डा. नन्दकुमारमहोदयाः समागतानामतिथीनां श्रोतृणां सभाध्यक्षाणां समेषां स्वागतं व्यदधन् । धन्यार्पणं संचालकमहोदयाः अकुर्वन् ।







संस्कृतसप्ताहस्य पञ्चमदिवसे २४.०८.२०२१ दिनाङ्के श्रावणकृष्णद्वितीयायां मङ्गलवासरे शुभसायंकाले विश्वविद्यालयस्य अभिनवकलाविभागेन गीतवाद्यनृत्यसभा आयोजिता । संगीतसाहित्यकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः इति भर्तृहरिणा संगीतस्य महत्त्वं प्रत्यपादि । गीर्वाणेषु कस्य न प्रियम्? । संगीतं वाद्यं नृत्यं च मनोरञ्जकं सत् सहृदयानां मनांसि रमयति । तादृशः एष कार्यक्रमः संस्कृतसप्ताहान्तर्गततया आयोजितः । व्याकरणविभागस्य सहाचार्यः डा. अवनीन्द्रकुमारमहोदयः कार्यक्रमस्यास्य संचालनम् अकरोत् । संगीतविषयस्य अध्यापकाः डा. वैद्यसुब्रह्मण्यमहोदयाः अस्मत्कालिकाः तेषां शिष्याश्च संगीतकार्यक्रमं निरवहन् । वाद्यसंगीतस्य अध्यापकः डा. समप्रभाकरविद्वन्महोदयाः सितारवाद्यं प्रादर्शयन् । नृत्यविषयस्य अध्यापकाः श्रीमन्तः एम्. ए. अयप्पमहोदयाः कूचिपुडिनृत्यं प्रादर्शयन् । समागतानां समेषां स्वागतम् अनुसन्धानप्रकाशनविभागस्य उपाचार्यः डा. शिवरामभट्टमहोदयः अकरोत् । अनुवादविभागस्य सहाचार्यः डा. नन्दनभट्टमहोदयः सर्वेषां कृते धन्यवादान् व्याहरन् ।




संस्कृतसप्ताहस्य षष्ठदिवसे २५.०८.२०२१ दिनाङ्के संगीतकार्यक्रमः भगवद्गीतापारायणकार्यक्रमश्च आयोजितः आसीत् । विश्वविद्यालयस्य संगीतविषयस्य सहायाचार्यैः संगीतं कुलभूषणविभागानां प्राध्यापकानां डा. वैद्यसुब्रह्मण्यमहोदयानां मार्गदर्शने शिष्याः छात्राः अन्नमयाचार्यकृतिषु अधीयानाः संगीतकार्यक्रमं कृतवन्तः । अस्मिन् समये छात्राणां गायनं कुलपतयः प्रशंसितवन्तः । कार्यक्रमे समागतानां समेषां स्वागतम् अनुसन्धानविभागस्य उपाचार्यः डा. शिवरामभट्टमहोदयः अकरोत् । कार्यक्रमावसाने धन्यवादसमर्पणम् अनुवादविभागस्य सहाचार्यः डा. नन्दनभट्टमहोदयः अकुर्वत् । कार्यक्रमस्यास्य संचालनं डा. वैद्यसुब्रह्मण्यमहोदयाः अकुर्वन् । अस्मिन्नेव दिवसे भगवद्गीतायाः एकादशाध्यायस्य पारायणकार्यक्रमः अपि आयोजितः आसीत् । अस्य संचालनं डा. नारायणमहोदयाः अकुर्वन् ।




## समापनसमारोहः

संस्कृतसप्ताहस्य सप्तमदिवसे २६.०८.२०२१ दिनाङ्के संस्कृतसप्ताहसमापनस्य समापनकार्यक्रमः अन्तर्जालमाध्यमेन आयोजितः आसीत् । अस्य कार्यक्रमस्य मुख्यातिथिरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य मान्याः प्रभारिकुलपतयः आचार्याः के. वि. मुरलीधरराममहोदयाः उपस्थिताः आसन् । वैदिकप्रार्थनया कार्यक्रमस्य आरम्भः समजनि । श्रीमन्तः विश्वनाथशर्मामूर्तिमहोदयाः ऋग्वेदस्य, श्रीमन्तः राहुल गोपालकृष्णघनपाठिमहोदयाः यजुर्वेदस्य, श्रीमन्तः आर्. श्रीनाथाचार्यमहोदयाः सामवेदस्य, श्रीमन्तः उपाध्यायलक्ष्मणशर्ममहोदयाः अथर्ववेदस्य च मन्त्रोच्चारणमकार्षुः । संस्कृतगीतं गीतवती श्रीमती वसुधामहोदया । आचार्याः गणेशदत्तशर्ममूर्तिमहोदयाः स्वागतभाषणमकुर्वन् । संयोजकाः आचार्याः च. रङ्गनाथन्महोदयाः इतिवृत्तनिवेदनं कृतवन्तः । मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः अध्यक्षभाषणं कृतवन्तः । संयोजकाः धन्यवादसमर्पणं कृतवन्तः । समापनकार्यक्रमस्य संचालनं संयोजकाः आचार्याः च. रङ्गनाथन्महोदयाः कृतवन्तः । एवम् ऐषमः संस्कृतसप्ताहः महता उत्साहेन आचरितः ।

